॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## गंगा अष्टकम्

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## गंगा अष्टकम्

ॐ नमो गंगायै विश्वरूपिण्यै नारायण्यै नमो नमः

अथ श्री गंगा अष्टकम्

भगवति तव तीरे नीरमात्राशनोऽहं,
विगतविषयतृष्णः(ख्) कृष्णमाराधयामि ।
सकलकलुषभंगे स्वर्गसोपानसंगे,
तरलतरतरंगे देवि गंगे प्रसीद ॥ 1॥

ॐ नमो गंगायै विश्वरूपिण्यै नारायण्यै नमो नमः

अथ श्री गंगा अष्टकम्

भगवति तव तीरे नीरमात्राशनोऽहं,
विगतविषयतृष्णः(ख्) कृष्णमाराधयामि ।
सकलकलुषभंगे स्वर्गसोपानसंगे,
तरलतरतरंगे देवि गंगे प्रसीद ॥ 1 ॥

भगवति भवलीलामौलिमाले तवांभः(ख्),
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ।
अमरनगरनारीचामरमरग्राहिणीनां,
विगतकलिकलंकातंकमंके लुठन्ति ॥ 2 ॥

ब्रह्माण्डं(ङ्) खंडयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती,
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात् स्खलन्ती ।
क्षोणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं(म्) भर्त्सयन्ती,
पाथोधिं(म्) पूरयन्ती सुरनगरसरित् पावनी नः(फ्) पुनातु ॥ 3 ॥

मज्जन्मातंगकुंभच्युतमदमदिरामोदमत्तालिजालं,
स्नानैः(स्) सिद्धांगनानां(ङ्) कुचयुगविगलत् कुंकुमासंगपिंगम् ।
सायंप्रातर्मुनीनां(ङ्) कुशकुसुमचयैश्छन्नतीरस्थनीरं,
पायान्नो गांगमंभः(ख्) करिकलमकराक्रान्तरं हस्तरंगम् ॥4॥

आदावादि पितामहस्य नियमव्यापारपात्रे जलं,
पश्चात् पन्नगशायिनो भगवतः(फ्) पादोदकं पावनम् ।
भूयः(श्) शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं(ङ्),
कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ 5 ॥

शैलेन्द्रादवतारिणी निजजले मज्जज्जनोत्तारिणी,
पारावारविहारिणी भवभयश्रेणी समुत्सारिणी ।
शेषांगैरनुकारिणी हरशिरोवल्लीदलाकारिणी,
काशीप्रान्तविहारिणी विजयते गंगा मनोहारिणी ॥ 6॥

कुतो वीचिर्वीचिस्तव यदि गता लोचनपथं(न्),
त्वमापीता पीतांबरपुरनिवासं(म्) वितरसि ।
त्वदुत्संगे गंगे पतति यदि कायस्तनुभृतां(न्),
तदा मातः(श्) शातक्रतवपदलाभोऽप्यतिलघुः ॥ 7॥

गंगे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये,
पूर्णब्रह्मस्वरूपे हरिचरणजोहारिणी स्वर्गमार्गे ।
प्रायश्चितं यदि स्यात् तव जलकणिका ब्रह्महत्यादिपापे,
कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गंगे प्रसीद ॥ 8॥

मातर्जाह्नवि शंभुसंगमिलिते मौलौ निधायाञ्जलिं(न्),
त्वत्तीरे वपुषोऽवसानसमये नारायणांघ्रिद्वयम् ।
सानन्दं स्मरतो भविष्यति मम प्राणप्रयाणोत्सवे,
भूयाद्भक्तिरविच्युता हरिहरद्वैतात्मिका शाश्वती ॥ 9॥

गंगाष्टकमिदं पुण्यं, यः(फ्) पठेत् प्रयतो नरः ।
सर्वपापविनिर्मुक्तो, विष्णुलोकं स गच्छति ॥ 10॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य
श्रीगोविन्दभगवत्पूज्यपादस्यशिष्या
श्रीमच्छङ्करभगवतः(ख्) कृतौ गङ्गाष्टकस्तोत्रं सम्पूर्णम् ।